# kAverIpUjA

# कावेरीपूजा

## Document Information

Text title : kAverI pUjA from vratachUDAmaNi

File name : kAverIpUjAvratachUDAmaNi.itx

Category : devii, pUjA, nadI, devI

Location : doc_devii

Transliterated by : Nidhish Aaryan nidhish.184 at gmail.com

Proofread by : Nidhish Aaryan nidhish.184 at gmail.com

Description/comments : From Vratachudamani

Latest update : October 6, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# कावेरीपूजा

॥ श्री गणेशाय नमः ॥ श्री गुरुभ्यो नमः ॥

सङ्कल्पः ।
विशेषेण मत्सम्बन्धिसमस्तपापक्षयार्थं
सौमङ्गल्यसौभाग्यसन्तानसौख्यायुरारोग्यसिद्ध्यर्थञ्च श्री कावेरी पूजां करिष्ये ॥ घण्टानादादिध्यानान्तं कृत्वा ॥ इमम्मे सुशोमया । आपो वा इदं सर्वं आप ॐ ॥

देवता आवाहनम् ।
ॐ भूः कावेरीं आवाहयामि ॥ ॐ भुवः इत्यादिना कावेरीमावाह्य ॥

मरुद्वृधे महालक्ष्मीस्सह्यकन्या सरस्वती ।
अगस्त्यपत्नी कावेरी लोपामुद्रा वरप्रदा ॥

कमण्डलुसमुत्पन्ना सर्वतीर्थाधिदेवता ।
विरजा दक्षिणा गङ्गा ब्रह्मविष्णुशिवात्मिका ॥

चतुर्विधफलोद्धात्री चतुराननकन्यका ।
सर्वाभीष्टप्रदात्री च नाम्नां षोडशकं स्मृतम् ॥

एभिर्नामपदैर्नित्यं पूजयेद्भक्तिमान्नरः ॥

ध्यानम् ।
ॐ अच्छस्वच्छलसद्दुकूलवसनां पद्मासनाद्ध्यासिनीं
हस्तन्यस्तवराभयाब्जकलशां राकेन्दुकोटिप्रभाम् ।
भास्वद्भूषणगन्धमाल्यरुचिरां चारुप्रसन्नाननां
श्री गङ्गादिसमस्ततीर्थनिलयां ध्यायामि कावेरिकाम् ॥

आवाहनम् ।
श्रीकण्ठविश्वेश्वरसन्निभानि लिङ्गानि यद्रोधसि लक्षकोट्यः ।
जलप्रवाहेपि च कोटिकोट्यः कवेरजायाश्शिवमूर्तयस्स्युः ॥

पयांसि तीर्थानि शिलाश्च देवता दिवौकसो वालुकतां प्रपन्नाः ।
अतो नदी सह्यगिरिप्रसूता सरित्सुमुख्यामनुजैरलभ्या ॥

रत्नासनम् ।
आदावादि विधातृमानससुता पश्चात्कवेरात्मजा
भूयःकुम्भभवस्य तस्य दयिता तस्मान्नदीरूपिणी ।
श्रीरङ्गातुलकुम्भघोणविलसन्मायूरमद्ध्यार्जुन
श्वेतारण्यमुखस्थलेषुमहिता सह्याद्रिजा दृश्यते ॥

पाद्यम् ।
मरुद्वृधे महादेवी महाभागे मनोहरे ।
सर्वाभीष्टप्रदे लोकमातः पाद्यं ददामि ते ॥

मरुद्वृधेमान्यजलप्रवाहे कवेरकन्ये नमतां शरण्ये ।
मान्ये जगत्पूज्यतमप्रभावे  कावेरिकावेरि मम प्रसीद ॥

अर्घ्यम् ।
सह्यपादोद्भवे देवि श्रीरङ्गोत्सङ्गामिनि ।
कावेरीनामविख्याते गृहाणार्घ्यं नमोऽस्तुते ॥

प्राचीनवाक्कीर्तित पुण्यकीर्ते कल्याणिभक्तेप्सितदानधुर्ये ।
कुम्भोद्भवप्रेरितगुम्भितार्थे कावेरिकावेरि मम प्रसीद ॥

आचमनम् ।
श्रीसह्यशैलतनये सर्वासह्य निवारिणि ।
प्रसादं कुरु मे देवि प्रसन्नाभव सर्वदा ॥

संसारविस्रंसिनि संस्कृतानां सर्वाघसंहारिणि सर्ववन्द्ये ।
समस्तलोकैकशरण्यमूर्ते कावेरिकावेरि मम प्रसीद ॥

पञ्चामृतस्नानम् ।
तुलामासेतु कावेरी सर्वतीर्थाश्रिता नदी ।
पञ्चपातक संहर्त्री वाजिमेधफलप्रदा ॥

भक्तानुकम्पे मुनिभाग्यलक्ष्मि नित्ये जगन्मङ्गळदानशीले ।
निरञ्जने दक्षिणदेशगङ्गे कावेरिकावेरि मम प्रसीद ॥

शुद्धोदकस्नानम् ।

कावेरीतीरजन्मानः मृगपक्षिमहीरुहाः ।
तद्वारिशीतवातैश्च स्पृष्टामुक्तिं प्रयान्ति वै ॥

मोक्षश्रियोपासित पादपद्मे नित्येहरीशद्रुहिणस्वरूपे ।
सदाशिवेधातृवरप्रसादे कावेरिकावेरि मम प्रसीद ॥

वस्त्रम् ।
कवेरकन्येकावेरि निम्नगानाथनायिके ।
वस्त्राणिवसभूवस्त्रे भुक्तिमुक्तिप्रदायिनि ॥

देवर्षिपूज्ये विमले नदीशेपरात्परेभावित नित्यपूर्णे ।
समस्तलोकोत्तमतीर्थमातः कावेरिकावेरि मम प्रसीद ॥

यज्ञोपवीतम् ।
सर्वयज्ञाश्रयतटे सर्वयज्ञसहायिनि ।
यज्ञाङ्गसम्भवे देवि सर्वयज्ञफलप्रदे ॥

कलिप्रभूताखिलदोषनाशेविशुद्धविज्ञानजलप्रवाहे ।
कदम्बकल्हारकदम्बपूर्णे कावेरिकावेरि मम प्रसीद ॥

मङ्गळद्रव्यम् ॥ हरिद्रां कुङ्कुमम् ।
जयदेवि जगन्मातर्लोपामुद्रे पुरातने ।
जयभद्रे भवोद्धारि मङ्गळे मङ्गळप्रदे ॥

प्रसीदकारुण्य गुणाभिरामे प्रसीद कल्याणतरप्रवाहे ।
प्रसीद कामादिहरेपवित्रे कावेरिकावेरि मम प्रसीद ॥

गन्धम् ।
चन्दनागरुकस्तूरी हिमवालुककेसरैः ।
राङ्कवैस्साङ्कवैर्युक्तं गन्धं स्वीकुरु सह्यजे ॥

आद्ये परे चिन्मयपुण्यपादे पचेळिमप्रौढकवेरभाग्ये ।
अनन्यसाधारण वैभवाढ्ये कावेरिकावेरि मम प्रसीद ॥

अक्षतान् ।
यस्यां सकृत्स्नानमात्रान्नरोऽक्षय्यफलं लभेत् ।
नक्षत्रमाल्यवच्छुभ्रामक्षतैरर्चयाम्यहम् ॥

आभरणम् ।

किरीटहारकेयूरकुण्डलाङ्गदकङ्कणैः ।
हम्सकैर्मेखलाद्यैश्च भूषयेत्वां मरुद्वृधाम् ॥

ताटङ्कादिकम् ।
ताटङ्कं कण्ठसूत्रञ्च सिन्दूरं कज्जलादिकम् ।
सौमङ्गल्यप्रदेदेवि गृहाणागस्त्यवल्लभे ॥

पुष्पाणि ।
तुलसीबिल्वमन्दारकुशाग्रशतपत्रकैः ।
इन्दीवरैःकोकनदैर्हल्लकैःकमलैरपि ॥

कल्हारैःपुण्डरीकैश्च पुष्पैस्सौगन्धिकादिभिः ।
जातीचम्पकपुन्नागमल्लिकाकेतकादिभिः ॥

सुरभिद्रोणवासन्ती गन्धराजकदम्बकैः ।
पुष्पैस्सह्यसुतेमातर्वैण्यलङ्करणं कुरु ॥

बहुजन्मकृतानेकवासनावासितात्मभिः ।
दिव्यैस्सुमवरैःपूज्यां पूजयेत्पुष्पजातिभिः ॥

अथाङ्गपूजा ।
मरुद्वृधायै नमः - पादौ पूजयामि । महालक्ष्म्यै-
गुल्फौ । सह्यकन्यकायै - जङ्घे । सरस्वत्यै-जानुनी ।
अगस्त्यपत्न्यै - मध्यम् । कावेर्यै - नाभिम् । लोपामुद्रायै -
हृदयम् । वरप्रदायै - स्तनौ । कमण्डलुसमुत्पन्नयै -
बाहू । सर्वतीर्थाधिदेवतायै - कण्ठम् । विरजायै - नासिकाम् ।
दक्षिणगङ्गायै - श्रोत्रे । ब्रह्मविष्णुशिवात्मिकायै - नेत्रे ।
चतुर्विधफलोद्धात्र्यै - वक्त्रम् । चतुरानन कन्यकायै -
शिरः । सर्वाभीष्टप्रदात्र्यै नमः - सर्वाण्यङ्गानि पूजयामि ॥

## ॥ श्रीकावेर्यष्टोत्तरशतनामावळिः ॥

ॐ अनन्त-गुण-गम्भीरायै नमः ।
ॐ अर्कपुष्कर-सेवितायै नमः ।
ॐ अमृतस्वादु-सलिलायै नमः ।
ॐ अगस्त्यमुनि-नायिकायै नमः ।

ॐ आशान्त-कीर्ति-तिलकायै नमः । ५।
ॐ आशुगागम-वर्द्धिन्यै नमः ।
ॐ इतिहास-पुराणोक्तायै नमः ।
ॐ ईतिबाधा-निवारिण्यै नमः ।
ॐ उन्मत्तजन-दूरस्थायै नमः ।
ॐ ऊर्जितानन्द-दायिन्यै नमः । १०।
ॐ ऋषिसङ्घ-सुसंवीतायै नमः ।
ॐ ऋणत्रय-विमोचनायै नमः ।
ॐ लुप्त-धर्म-जनोद्धारायै ।
ॐ लूनभाव-विवर्जितायै नमः ।
ॐ एधिताखिल-लोकश्रियै नमः । १५।
ॐ ऐहिकामुष्मिक-प्रदायै नमः ।
ॐ ओङ्कारनाद-निनदायै नमः ।
ॐ ओषधीकृत-जीवनायै नमः ।
ॐ औदार्यगुण-निर्दिष्टायै नमः ।
ॐ औदासीन्य-निवारिण्यै नमः । २०।
ॐ अन्तःकरण-संसेव्यायै नमः ।
ॐ अच्छ-स्वच्छ-जलाश्रयायै नमः ।
ॐ कपिलाख्य-नदी-स्निग्धायै नमः ।
ॐ करुणा-पूर्ण-मानसायै नमः ।
ॐ कावेरी-नाम-विख्यातायै नमः । २५।
ॐ कामितार्थ-फल-प्रदायै नमः ।
ॐ कुम्भघोण-क्षेत्र-नाथायै नमः ।
ॐ कौतुकप्रथम-प्रभायै नमः ।
ॐ खगराज-रथोत्साह-रङ्गस्थल-सुशोभितायै नमः ।
ॐ खगावळि-समाक्रान्तकल्लोलावळिमण्डितायै नमः ३०।
ॐ गजारण्य-सुविस्तीर्ण-प्रवाह-जनमोहिन्यै नमः ।
ॐ गायत्र्याख्य-शिला-मद्ध्यायै नमः ।
ॐ गरुडासन-भक्तिदायै नमः ।
ॐ घन-गम्भीर-निनाद-निर्जरप्राप्त-निर्झरायै नमः ।
ॐ चन्द्रपुष्कर-मध्यस्थायै नमः । ३५।
ॐ चतुरानन-पुत्रिकायै नमः ।

ॐ चोलदेश-जनोद्धार-ग्रीष्मकाल-प्रवाहिन्यै नमः ।
ॐ चुञ्चक्षेत्र-समानीतायै नमः ।
ॐ छद्मदोष-निवारिण्यै नमः ।
ॐ जम्बूद्वीप-सरिच्छ्रेष्ठ-नदी-नद-गरीयस्यै नमः । ४०।
ॐ झङ्कारनाद-संस्पृष्ट-षट्पदाळि-समाकुलायै नमः ।
ॐ ज्ञानैक-साधन-परायै नमः ।
ॐ ज्ञप्तिमात्रर्ति-हारिण्यै नमः ।
ॐ टिट्टिभारावस-व्याज-द्विज-स्तुति-पात्रिण्यै नमः ।
ॐ ठङ्कारनाद-सम्भेद-झर्झरीकृत-पर्वतायै नमः । ४५।
ॐ डाकिनी-शाकिनी-सङ्घनिवारण-सरित्तटायैनमः ।
ॐ ढक्का-निनादपारीण-पार्वतीश-समाश्रितायै नमः ।
ॐ णान्तवाच्य-द्विजाष्टाङ्गयोग-साधन-तत्परायै नमः ।
ॐ तरङ्गावळि-संविद्ध-मृदु-वालुक-शोभितायै नमः ।
ॐ तपस्विजन-सत्कार-निवेशित-शिलासनायै नमः । ५०।
ॐ तापत्रय-तरून्मूल-गङ्गादिभिरभिष्टुतायै नमः ।
ॐ थान्त-प्रमथ-संसेव्य-साम्ब-सान्निध्य-कारिण्यै नमः ।
ॐ दया-दाक्षिण्य-सत्कारशील-लोक-सुभावितायै नमः ।
ॐ दाक्षिणात्य-जनोद्धार-निर्विचार-दयान्वितायै नमः ।
ॐ धन-मान-मदान्धादि-मर्त्य-निर्वर्तन-प्रियायै नमः । ५५।
ॐ नमज्जनोद्धार-शीलायै नमः ।
ॐ निमज्जज्जन-पावनायै नमः ।
ॐ नागारिकेतु-निलयायै नमः ।
ॐ नाना-तीर्थाधि-देवतायै नमः ।
ॐ नारीजन-मनोल्लासायै नमः । ६०।
ॐ नानारूप-फल-प्रदायै नमः ।
ॐ नारायण-कृपा-रूपायै नमः ।
ॐ नादब्रह्म-स्वरूपिण्यै नमः ।
ॐ पराभूत-समस्ताघायै नमः ।
ॐ पशु-पक्ष्यादि-जीवनायै नमः । ६५।
ॐ पापतूलाग्नि-सदृशायै नमः ।
ॐ पापिष्ठजन-पावनायै नमः ।
ॐ फणीन्द्र-कीर्तित-कलायै नमः ।

ॐ फलदान-परायणायै नमः ।
ॐ बहुजन्म-तपो-योग-फलसम्प्राप्त-दर्शनायै नमः । ७०।
ॐ बाहुरूप-द्विपार्श्वस्थ-स्वमातृक-जलार्थिनां-कळमक्षेत्र-
शाल्यन्न-दान-निर्जित-वित्तपायै नमः ।
ॐ भगवत्कृत-सन्तोषायै नमः ।
ॐ भास्करक्षेत्र-गामिन्यै नमः ।
ॐ भागीरथी-समाक्रन्त-तुलामास-जलाश्रयायै नमः ।
ॐ मज्जद्दुर्जन-प्राग्जन्म-दुर्जयांहः प्रमार्जन्यै नमः । ७५।
ॐ माघ-वैशाखादि-मास-स्नान-स्मरण-सौख्यदायै नमः ।
ॐ यज्ञ-दान-तपः-कर्मकोटि-पुण्य-फल-प्रदायै नमः ।
ॐ यक्ष-गन्धर्व-सिद्धाद्यैरभिष्टुत-पदद्वयायै नमः ।
ॐ रघुनाथ-पदद्वन्द्व-विराजित-शिलातलायै नमः ।
ॐ रामनाथपुरक्षेत्र-कामधेनु-समाश्रितायै नमः । ८०।
ॐ लवोदक-स्पर्शमात्र-निर्वाण-पद-दायिन्यै नमः ।
ॐ लक्ष्मी-निवास-सदनायै नमः ।
ॐ ललना-रत्न-रूपिण्यै नमः ।
ॐ लघूकृत-स्वर्ग-भोगायै नमः ।
ॐ लावण्य-गुण-सागरायै नमः । ८५।
ॐ वह्निपुष्कर-सान्निद्ध्यायै नमः ।
ॐ वन्दिताखिल-लोकपायै नमः ।
ॐ व्याघ्रपाद-क्षेत्र-परायै नमः ।
ॐ व्योमयान-समावृतायै नमः ।
ॐ षट्काल-वन्द्य-चरणायै नमः । ९०।
ॐ षट्कर्म-निरत-प्रियायै नमः ।
ॐ षडास्य-मातृ-संसेव्यायै नमः ।
ॐ षडूर्मि-जित-सोर्मिकायै नमः ।
ॐ सकृत्स्मरण-संशुद्ध-तापत्रय-जनाश्रितायै नमः ।
ॐ सज्जनोद्धार-सन्धानसमर्थ-स्व-प्रवाहिन्यै नमः । ९५।
ॐ सरस्वत्यादि-देवीभिरभिवन्दित-निर्झरायै नमः ।
ॐ सह्यशैल-समुद्भूतायै नमः ।
ॐ सह्यासह्य-जन-प्रियायै नमः ।
ॐ सङ्गमक्षेत्र-सामीप्यायै नमः ।

ॐ स्ववशार्थ-चतुष्टयायै नमः । १००।
ॐ सौभरिक्षेत्र-निलयायै नमः ।
ॐ सौभाग्य-फल-दायिन्यै नमः ।
ॐ संशयाविष्ट-दूरस्थायै नमः ।
ॐ साङ्गोपाङ्ग-फलोदयायै नमः ।
ॐ हरि-ब्रह्मेशलोकेश-सिद्धवृन्दार-वन्दितायै नमः । १०५।
ॐ क्षेत्र-तीर्थादि-सीमान्तायै नमः ।
ॐ क्षपानाथ-सुशीतळायै नमः ।
ॐ क्षमातलाखिलानन्द-क्षेम-श्री-विजयावहायै नमः । १०८।

॥ इति श्रीकावेरी अष्टोत्तरशतनामावळिः ॥

## उत्तराङ्गपूजा ।

धूपम् ।
रङ्गत्रयोत्सङ्गविराजमाने ब्रह्माद्रिकूटाश्रिततीर्थगर्भे ।
समस्तसिद्धाश्रमरम्यतीर्थे कावेरिकावेरि मम प्रसीद ॥

दशाङ्गोगुग्गुळोपेतस्सुगन्धोघ्राणतर्पणः ।
मरुद्वृधेऽम्बकावेरि धूपोयन्ते समर्पितः ॥

दीपम् ।
तुलागतेर्केतटिनि वराभिर्गङ्गादिभिस्सेवितपादपद्मे ।
त्रिकोटितीर्थाश्रम पुष्कराढ्ये कावेरिकावेरि मम प्रसीद ॥

आपोज्योतिस्त्वमस्यम्ब कुम्भसम्भवतेजसा ।
तेजःप्रदात्रि कावेरि दीपोयं प्रतिगृह्यताम् ॥

नैवेद्यम् । पाणीयम् । आपोशनम् ।
ददासि तुल्याभिरनर्घधान्यान्यशेषचोळीयजनस्यदेवि ।
भुक्तिप्रदेमुक्तिविधानदक्षे कावेरिकावेरि मम प्रसीद ॥

अन्नं चतुर्विधं रुच्यं शाकव्यञ्जन संयुतम् ।
सफलं सघृतं भुङ्क्ष्व कावेरि तटितां वरे ॥

फलेति ताम्बूलम् ।
निजाभिधानश्रवणाद्दतानां निश्शेषपापक्षयकारिणीत्वम् ।

निदाघतृष्णादि निरास दक्षे कावेरिकावेरि मम प्रसीद ॥

नीराजनम् ।
पराशरागस्त्यवसिष्ठमुख्यैर्महर्षिभिर्मान्यतपोभिरम्ब ।
त्वमाश्रिताकर्मठसिद्धिहेतुः कावेरिकावेरि मम प्रसीद ॥

सर्वतीर्थैस्तुलामासे त्वन्नीराजनपादुका ।
नीराजयामि भक्त्यात्वां कावेर्यम्बमरुद्वृधे ॥

प्रदक्षिणम् ।
मायूरमद्ध्यार्जुनकुम्भघोणश्रीरङ्गचुञ्चुस्थलघट्टगात्वम् ।
सस्योद्भवे सिन्धुयुते स्वतन्त्रे कावेरिकावेरि मम प्रसीद ॥

प्रदक्षिणं करोमित्वां पुरुषार्थप्रदायिनि ।
दक्षिणावर्तकश्रीनिवासप्रीते मरुद्वृधे ॥

नमस्कारान् ।
ब्रह्मादिभिर्देववरैस्त्रिसन्ध्यं वसिष्ठपूर्वैर्मुनिभिर्वरिष्ठैः ।
नित्यं गजारण्यगतैर्निषेव्ये कावेरिकावेरि मम प्रसीद ॥

नमस्ते तटितां मुख्ये निगमागम संस्तुते ।
पाहिपाह्यम्ब कावेरि प्रपन्नं मां कृपादृशा ॥

सुवासिनीभ्यः वायनदानानि ।
सुवासिनीनाञ्च निजाश्रितानां पतिप्रियत्वञ्च सुतादिवर्गम् ।
दास्यस्युदारं बहुभोगभाग्यं कावेरिकावेरि मम प्रसीद ॥

निजप्रवाहाप्रवलब्धपुण्यप्रसिद्धसत्कर्मफलोदयेन ।
नृणामभीष्टार्थविधायिनीत्वं कावेरिकावेरि मम प्रसीद ॥

पापक्षयं पारिशुध्यमायुरारोग्यमेवच ।
सौभाग्यमपिसन्तानं ज्ञानं देहि मरुद्वृधे ॥

इति सम्प्रार्थ्य ॥ छत्रचामरादिनासम्पूज्य विसर्जयेत् ॥

॥ इति व्रतचूडामणौ कावेरी पूजाविधिः ॥

Encoded and proofread by Nidhish Aaryan nidhish.184 at gmail.com

*kAverIpUjA*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*